# संस्कृतव्याकरणे मुनित्रयावदानसमीक्षा

**नारायणजोशी**

Department of Vyakaran (Sanskrit Grammar)
Sharada Sanskrit Vidyapeeth,
Mahendranagar, Nepal

*Submitted : 28 Nov.2025*
*Reviewed : 18 Dec.2025*
*Accepted : 30 Dec. 2025*
***DOI:*** *10.3126/kdk.v6i1.90125*

***Corresponding Author:***
*Narayan Joshi*
***Email:*** narayanbabujoshi2050@gmail.com
**Orcid**: *https://orcid.org/0009-0005-4094-3948*

CC BY NC
*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** *संस्कृतव्याकरणशास्त्रस्य सुदीर्घपरम्परा विद्यते । सामान्यविषयादारभ्य सूक्ष्मविषयपर्यन्तं व्याकरणशास्त्रस्य प्रभावो दृश्यते । ध्वनिवर्णरूपपदपदावलिवाक्यांशादिविवेचनपक्षतः दार्शनिकचिन्तन-पर्यन्तं व्याकरणशास्त्रं करोति । भाषायाः परापश्यन्तिमध्यमाव्यक्तवाणीतः व्यक्तवैखरीवाणीपर्यन्तं व्याकरणशास्त्रस्य चिन्तनं विद्यते । भाषणाय भाषापरिष्काराय च संस्कृतव्याकरणस्य महती भूमिका दृश्यते । संसारे प्रवृत्तानां सर्वासामपि विद्यानाम्मूलं परमेश्वरोपदिष्टो वेद एवास्ति । व्याकरणं वेदस्य षट्स्वङ्गेषु मुखमस्ति । तेन श्रुतिस्मृतिपुराणादिषु व्याकरणस्य प्राधान्यं दृश्यत एव । पुरावृत्तोत्खनने तु संस्कृत-व्याकरणाध्ययनकार्ये विधातुः नाम सर्वादौ आयाति । कालान्तरे जगति पाणिनिकात्यायनपतञ्जलीनां नाम त्रिमुनीति समूहवाचकत्वेनायाति । आदौ बहुविदुषां अवदानं संस्कृतव्याकरणे अवश्यमेवास्ति । पुरा विद्वद्भिः संस्कृतव्याकरणाशास्त्रस्य अध्ययनाध्यापनसंस्कारस्य स्थापना कृता । तस्य संस्कारस्य प्रवर्धन-संवधर्नन-परिष्कारादिकार्ये पाणिनि-कात्यायन-पतञ्जलीनामेव महत्प्रयासः सञ्जातः येन संस्कृत-व्याकरणाशास्त्रं समृद्धमद्यपर्यन्तमस्ति । लघुसूत्रस्यप्रारम्भाद् गम्भीर-व्याख्यापर्यन्तं संस्कृतव्याकरणस्य व्रज्या गता । पाणिनिना महता प्रयासेन महेश्वरप्रसादात् चतुर्दश सूत्राणि लब्धानि ततः अष्टाध्यायीति नाम्नः सूत्रग्रन्थस्य निर्मितिपश्चात् कात्यायनेन वार्तिकरचना कृता । एवं रीत्या सूत्रप्रणयनेन वार्तिकप्रणयनेन च संस्कृतव्याकरणबोधे अपेक्षितसारल्याभावात् सूत्राणां सुष्ठुतया परिष्काराय नैकविधमतमतान्तरगम्भीरमन्थनपूर्वकं विश्लेषणाय च पतञ्जलिना महाभाष्यं प्रणीतम् । अनया रीत्या उत्तरोत्तरं व्याकरणाशास्त्रस्य नाव्यं रूपं समागतम् । अष्टाध्यायी-पाणिनीयशिक्षा-जाम्बवतीविजय-द्विरूपकोश-धातुपाठ-गणपाठ-उणादिसूत्रपाठ-लिङ्गानुशासनम्-अष्टाध्यायी-स्वोपज्ञवृत्तिप्रभृतयः ग्रन्थाः पाणिनिना विरचिताः । वार्त्तिकलेखनमेव कात्यायनस्य महत्कार्यमस्ति । पाणिनिसूत्राणां वार्तिकनेन अनेन विवेचनं*

*कृतम् । पाणनीयसूत्राण्याधारीकृत्य रचितं वार्त्तिकपाठात्मकस्वरूपमेव महत्त्वपूर्णमस्ति । युधिष्ठिरमीमांशकानुसारं कात्यायनस्य समग्रवार्त्तिकग्रन्थ नोपलभ्यत इति ज्ञायते । तथैव पतञ्जलिना पाणिनीयसूत्राणां उत्कृष्टा व्यवहारोपयोगिनी व्याख्या कृता सा संस्कृतजगति महाभाष्येति नाम्ना प्रसिद्धा विद्यते । तत्र सतर्कं सोदाहरणं पाणिनीयसूत्राणां प्रत्येकपदानां विवेचनं कृतं वर्तते । निदानसूत्रम्, योगदर्शनम् महाभाष्यञ्चेति पतञ्जलेः मुख्यग्रन्थाः सन्ति । युधिष्ठिरानुसन्धानात्मकग्रन्धानुसारं महानन्दमिति महाकाव्यञ्चानेन लिखितमिति प्राप्यते । बालतः वृद्धपर्यन्तं मनुजानां कृते सामान्यतः दर्शनपर्यन्तविषयस्य ज्ञानं मुनित्रयस्य व्याकरणावदाने लब्धम् । लेखेऽस्मिन् मुनित्रयस्य संस्कृतव्याकरणे कृतावदानस्य समीक्षा कृता वर्तते । प्रस्तुतानुसन्धानकार्यं विश्लेषणात्मकविधिना सम्पादितमस्ति । संस्कृतव्याकरणे मुनित्रयस्यावदानं ज्ञात्वा समीक्षणमेवास्य लेखस्योद्देश्यं वर्तते ।*

**शब्दबीजानि** :अनुबन्धः, कुशाग्रबुद्धिः, कौमुदी, प्रणाली, विकरणः ।

## विषयपरिचयः

'मन' ज्ञाने इत्यस्माद्धातोः मन्धातोः मनेरुच्च इत्यनेन इन्प्रत्यये अकारस्य स्थाने उकारे कृते मुनिशब्दो भवति । पुंसि मुनिः मुनी मुनयः इत्थं रूपाणि चलन्ति । पुंल्लिङ्गे त्रय अवयवा यस्येति विग्रहे सङ्ख्याया अवयवे तयप् इत्यनेन तयपि कृते द्वित्रिभ्यां तयस्यायज्वा इत्यनेन तयपः स्थाने अयचि कृते यस्येति च इति सूत्रेण इकारलोपे सति स्वादिकार्ये जाते क्लीबे त्रयमिति शब्दः व्युत्पाद्यते । ततः मुनीनां त्रयमिति विग्रहे षष्ठीसमासो भूत्वा मुनित्रयशब्दः निर्मीयते । अत्र मुनित्रयशब्देन पाणिनिकात्यायनपतञ्जलीनां नाम समायाति । संस्कृतव्याकरणजगति अमीषां मुनीनां कृते त्रिमुनीति संज्ञा प्रथिता विद्यते । संस्कृतव्याकरणे मुनित्रयस्य महदवदानं विद्यते । तेषां कृत्या, तेषां कार्यैः तेषां लिखितज्ञानानुसारं अवदानविषये ज्ञानं भवति । विषयस्य गाम्भीर्यं विषयस्य आवश्यकत्वञ्च दरीदृश्यत एव । प्राचीनकालादेव व्याकरणस्य परम्परा विकसिता वर्तते । विकसन्तीं परम्परां समृद्धये परिष्करणे मुनित्रयस्य भूमिका उल्लेखनीया दृश्यते । पाणिनिना सूत्रात्मकमष्टाध्यायीग्रन्थः विरचितः, ततः सूत्राणां परिष्करणे विवेचने वार्त्तिककारस्य कात्यायनस्य भूमिका दृश्यते । कात्यायनस्य वार्त्तिकानि भाष्येऽपि चर्चिताः सन्ति । पतञ्जलिना व्याकरणमहाभाष्ये प्रत्येकपदानां व्याख्यानम्, सतर्कम्, सोदाहरणञ्च पाणिनीयसूत्राणां व्याकरणविषयस्य च विश्लेषणं कृतमस्ति । तदरिक्तं पाणिनिः धातुपाठगणपाठपाणिनीयशिक्षाप्रभृतिग्रन्थान् रचितवान् । कात्यायनस्य युधिष्ठिरमीमांशकानुसारं कात्यायनस्य अन्यग्रन्थलेखनस्य काचित्सूचना नास्ति । पतञ्जलेरपि योगदर्शनम्, निदानदर्शनञ्चेति सन्तीति युधिष्ठिरमीमांशकानुसन्धाने प्राप्यते । मुनित्रयस्य अवदाने ग्रन्थेषु वा संस्कृतव्याकरणस्य सामान्यतः दार्शनिकज्ञानपर्यन्तं समुपलभ्यन्ते । ध्वनिज्ञानम्, वर्णज्ञानम्, धातुज्ञानम्, शब्दज्ञानम्, वाक्यज्ञानम्, सूत्रात्मकज्ञानम्, प्रकृयाज्ञानम्, सूत्राणां विस्तृतविवेचनञ्चेति मुनित्रयस्यावदाने प्राप्यन्ते । युगपदेव मुनित्रयस्य अवदानविषये शोधाभावेन विषयेऽस्मिन् शोधान्तरालं जातमत आलेखोऽयं विलिखितः । अस्मिन्नालेखे मुनित्रयस्य परिचयपूर्वकं तेषामवदानस्य समीक्षणं कृयते । तत्समीक्षणं समीक्षासिद्धान्तानुसारं कृयते ।

## समस्याकथनमुद्देश्यञ्च

मुनित्रयस्य विषय एव प्रसिद्ध अत अस्य विषये जिज्ञासाः जागरिता भवन्ति । मुनित्रयस्य विषये उद्भावितानां जिज्ञासानां शमनाय शोधलेखोऽयं संरचितः । त्रिमुनिः कः ? त्रिमुनेरवदानं किम् ? तेषां कृत्यानि कानीत्यादीनि समास्याः समुद्भवन्ति ।

तथैव मुनित्रयेण कृतेऽवदाने समीक्षा नै जाता तेन समीक्षा कृता वर्तते । प्रकृतानां समुद्भावितानां सर्वासां जिज्ञासानां शमनीकरणमेवास्य मुख्योद्देश्यं वर्तते । तेन मुनित्रयस्यावदानसमीक्षणमेवास्य प्रयोजनमस्ति । समस्याः समाधातुं सारल्यं स्यादित्यपेक्षया निम्नाः शोधप्रश्नाः समुल्लिखिताः सन्ति । तद्यथाः-

**क)** मुनित्रयावदानं किमस्ति ?

**ख)** संस्कृतव्याकरणे मुनित्रयकृतावदानसमीक्षेत्यस्य कः अर्थः ?

**ग)** मुनित्रयावदानस्य समीक्षा कथं कृयते ?

**अध्ययनविधिः**

शोधकार्ये प्रचलितानां निगमनागमनपद्धतीनां समुचितःप्रयोगःकृतो वर्तते । प्रधानतया त्रिमुनिविषयकाध्ययनक्रमेनानाविदुषामावश्यकमतानामनुशीलनेन निगमनविधिःस्वीकृतेति । तत्रैव ग्रन्थसङ्ककलकत्वेन पुस्तकालयविधिरपि अवल्बितः । एवञ्च विश्लेषणात्मकतुलनात्मकविधिद्वारा विषय व्याख्यातो वर्तते । आलेखः एपिएनामकशैल्या संरचितो वर्तते ।

**सैद्धान्तिकपर्याधारः**

शाब्दशास्त्रस्यैवविषये वर्तत इदम् । मुनित्रयस्य विषयस्मिननुसन्धानपत्रे लिखितमस्ति । तेन पाणिनिकात्यायनपतञ्जलिविषयकग्रन्था अनुसन्धानपत्राणि टीकाः टिप्पणीप्रभृतिसामग्री च एवास्य विषयस्य सैद्धान्तिकाधाराः भवन्ति । अद्यपर्यन्तं त्रिमुनिविषयकसकलसाग्री एव सिद्धान्तभूमिः स्थापिता । व्याख्याविश्लेषणेन गुणदोषनिरूपणेनैतिहासिकसन्दर्भेण तुलनया च समीक्षणं कृयते विशेषतः । आलेखः समीक्षणात्मको वर्तते, अतः समीक्षणसिद्धान्तदृशा मुनित्रयस्यावदानस्य समीक्षा विधीयते ।

**सीमाङ्कनम्**

सकलेतिहासग्रन्थानुसारं त्रिमुनिविषये प्रस्तुतिप्रदानमत्रालेखे विस्तरशः न सम्भवति । तेनात्र समासेन त्रिमुनेः परिचयपूर्वकं तेषां योगदानविषये उल्लेखः कृतोऽस्ति । हिन्दीसंस्कृतानूदितनानाग्रन्थानां साहाय्येन इयं अनुसन्धात्मकलेखनिर्मितिः सञ्जाता । व्याकरणशास्त्रेतिहास-संस्कृतव्याकरणशास्त्रेतिहासविमर्शप्रभृति- ग्रन्थानाधारीकृत्य संस्कृतव्याकरणे तेषामवदानप्रस्तुतिः तेषामवदानस्य समीक्षणमस्य लेखस्य सीमा वर्तते ।

**विषयविश्लेषणम्**

संस्कृतव्याकरणशास्त्रस्य रचनाकाराणामनुसन्धाने तु दीर्घा परम्परा समायाति । व्याकरणशास्त्रस्य रचनाकाराणां सर्वत्र सर्वेषां परिचयोऽपि दुर्लभो वर्तते । अष्टाध्याय्यामुल्लिखितानुल्लिखताश्च रचनाकाराः सन्ति । यथा- ब्रह्मा–वृहस्पति–इन्द्र–शिव–वायु–भरद्वाज–भागुरि–पौष्करसादि–चारायण–काशकृत्स्न–शन्तनु–वैयाघ्रपद्य–माध्यन्दिनि–रौढि–शौनकाः (गौड,

२०५५, पृ.८७) पाणिनिपूर्ववर्तिवैयाकरणाः सन्ति । तथैव आपिशलि–काश्यप–गार्ग्य–गालव–चाक्रवर्म्मण–भरद्वाज–शाकटायन–शाकल्य–सेनक–स्फोटायनाः (गौड, २०५५, पृ.११७) अष्टाध्याययुल्लिखित- पाणिनेः पूर्ववर्तिनो वैयाकरणाः सन्ति । निरुक्तकारो यास्काचार्यः, वार्तिककार आचार्यः कात्यायनः, संग्रहकारो व्याडिश्च पाणिनेः समकालिकवैयाकरणाः सन्ति । एवं रीत्या टीकाकार-भाष्यकार-व्याख्याकार-वृत्तिकारवार्तिककाराणां महता प्रयासेन व्याकरणशास्त्रस्य परम्परा सुदृढा सञ्जाता । संस्कृतव्याकरणशास्त्रस्य विस्तारे नैकशविदुषाम् अतुलनीयं योगदानं दरीदृश्यते । व्याकरणशास्त्रस्य प्रथमप्रवक्ता ब्रह्मेति सर्वैरप्यतिहासविद्भिः स्वीक्रियते । एतस्य प्रमाणं ऋक्तन्त्रे दृश्यते 'ब्रह्मा बृहस्पतये प्रोवाच, वृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः' (त्रिपाठी, १९९०, पृ. १७) इति । व्याकरणशास्त्रपरम्परामध्ययनसौकर्याय त्रिधा विभज्याध्ययनं कर्तुं शक्यते– पाणिनिपूर्ववर्तिनी, पाणिन्यनुगा, पाणिन्युत्तरवर्तिनी चेति । पुनश्च पाणिनिपूर्ववर्तिपरम्परायामपि पाणिन्यस्मृताः पाणिनिस्मृताश्चेति द्विधा विभज्यते । पाणिनिना अस्मृता आचार्याः यथा- महेश्वर–वृहस्पति–इन्द्र–वायु–भरद्वाज–भागुरि–पौष्करसादि–चारायण–काशकृत्स्न–वैयाघ्रपद्म–माध्यन्दिनि–रौढि–शौनकि–गौतम–व्याडिश्चेति । एतदतिरिक्ता अपि मान्या वैयाकरणा आसन्नेव दाक्षिकौडिन्यप्रभृतयः किन्तु तेषां विषये वयं स्वल्पमपि न जानीमहे इति नैवोद्यमः कृतस्तेषामनुसूचनाय । केवलं तेभ्यो नमः शब्दपारायणशब्दपारङ्गतेभ्यः (त्रिपाठी, सं.१९९०, पृ.१७) । इत्थं महेश्वरादारभ्य व्याडिपर्यन्ताः पाणिनिपूर्ववर्तिनो वैयाकरणाः यथामतिः सङ्क्षेपेणानुसूचिताः । तथैवात्र पाणिनिना स्मृता आचार्याश्च यथाः आपिशलि–काश्यप–गार्ग्य–गालव–चाक्रवर्म्मण–भरद्वाज–शाकटायन–शाकल्य–सेनक–स्फोटायना इति दशैव (दाहाल, १९९०, पृ. ३३) ।

***त्रिमुनिपरिचयः***

व्याकरणशास्त्रे त्रिमुनिशब्देन पाणिनि–कात्यायन–पतञ्जलीनामवबोधो भवति । अत एव वैयाकरणसिद्धान्तकौमुद्या मङ्गलाचरणे भट्टोजिदीक्षितेन मुनित्रयमिति शब्दः प्रयुक्तः ।


तद्यथा – **मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते** (आचार्य, २०१३, पृ.१)॥

पाणिनिर्हि व्याकरणशास्त्रस्य केन्द्रविन्दुरस्ति । अत एव व्याकरणं पाणिनीयव्याकरणशब्देनापि व्यवह्रियते । यद्यपि तत्पूर्वमपि दश पाणिनिना स्मृताः, पञ्चदश पाणिन्यस्मृताचार्याः सन्त्येव व्याकरणशास्त्रप्रवक्तारस्तथापि भगवतः पाणिनेर्व्याकरणशास्त्रकेन्द्रविन्दुत्वं विलसत्येव तदुपस्थापनप्रावीण्येन । तेनैवात्र सङ्क्षेपेण पाणिन्यादीनां प्रमुखानां वैयाकरणानां परिचयोऽत्र स्थापितो वर्तते ।

**पाणिनिः** महर्षिः पाणिनिः संस्कृतव्याकरणपरम्परायाः मूर्धन्य आचार्योऽस्ति । अनेन लौकिकवैदिकोभयविधभाषोपयोगि व्याकरणं विरचय्य संस्कृतजगति महद् अवदानं कृतम् । अयं वैयाकरणानां शिरोरत्नमिव विभाति ।

महर्षेर्पाणिनेर्जन्म ख्रिष्टाब्दात् पञ्चशतवर्षात् पूर्वं भारतस्योत्तरपश्चिमे क्षेत्रे काबुलनद्याः सिन्धोश्च संगमे शलातुरनामके ग्रामेऽभूदिति युधिष्ठिरमीमांशकानुसन्धानेन कथितमस्ति। तथैव नैपालविदुषा विष्णुराजात्रेयेण नेपालस्य अर्घाखाँचीमण्डलस्य पँडेनानामके स्थानेऽभूदिति स्वकीयोपन्यासग्रन्थे उक्तमस्ति। तेन पाणिनेर्जनिविषये मतवैविध्यमस्ति। युधिष्ठिरमीमांशकेन तु स ग्रामो गान्धारक्षेत्रे वर्तते, अधुना तत्क्षेत्रं पाकिस्ताने वर्तत इत्यपि भणितमस्ति। अत एव पाणिनिः शालातुरीय इति नाम्नाऽपि लोके प्रसिद्धोऽभूत्। स शलातुरो ग्रामोऽधुना लाहुरनाम्ना लोके प्रख्यापितो वर्तते (त्रिपाठी, ई. २००८, पृ. ३७)। युधिष्ठिरमीमांसकमते तु महाभारतयुद्धकालाद् द्विशतवर्षपश्चाद् अर्थाद् विक्रमसंवत्सरात् एकोनत्रिंशत्शतसंवत्सरात्पूर्वमभूत् (मीमांसक, ई. २०३०, पृ. २०४)। पणिन अपत्यं पुमान् पाणिनिरिति व्युत्पत्या तस्य पितुर्नाम पणिन् आसीदिति अनुमीयते। पाणिनेः पाणिनिः, शालङ्की,शालातुरीयः, आहिकः, दाक्षीपुत्र पाणिनश्चेति षण्नामानि प्रचलितानि सन्ति (त्रिपाठी, ई. २००८, पृ. ३५) । तेषु शलङ्कस्यापत्यं पुमान् शालङ्कीरिति व्युत्पत्या तस्य पितुर्नाम शलङ्कोऽपि भवितुं शक्नोति। मातुर्नाम च दाक्ष्यासीत्। अत एव स दाक्षीपुत्रोऽपि कथ्यते। पाणिनेरनुजस्य नाम पिङ्गल आसीत्। पाणिनेर्गुरोर्नाम वर्ष आसीत्। तेनैव गुरूणा सह पाणिनिना विद्याध्ययनं कृतमिति कथयितुं शक्यते कथासरित्सागरानुसारेण।

पाणिनेर्वंशचित्रम् -



(मीमांसक, ई. २०३०, पृ. १८३)

महर्षिपाणिनेर्विषये किम्वदन्ती वर्तते – पाणिनिः पूर्वं जडमतिरासीत्। अत एव तस्य सतीर्थ्याश्छात्रास्तमुपहसन्ति स्म। जडमतित्वादेव कात्यायनद्वारा वादविवादे नैकवारं पराजितः। इत्थं सतीर्थ्याश्छात्रैरपमानितः कात्यायनात्पराजितश्च सन् प्रतिशोधार्थं 'विद्याकामस्तु गिरीशम्. इत्याद्युक्त्या उत्तराखण्डस्य गोपर्वताख्यं स्थानं गत्वा भगवतः शङ्करस्य भीषणं तपस्तेपे। उक्तञ्च–

**गोपर्वतमितिस्थानं शम्भोः प्रख्यापितं पुरा ।**
**यत्र पाणिनिना लेभे वैयाकरणिकाग्रता ॥**
**आराध्य तपसा तत्र विद्याकामेन शङ्करम् ।**
**प्राप व्याकरणं दिव्यं स च विद्यामुखं शुभम्** (दाहालः, १९९०, पृ. ३४) ॥

इत्थं तप्यमानस्य तस्य पाणिनेस्तपसा प्रसन्नो भगवान् शङ्करस्तं ब्रह्मज्ञानत्वेन वर्णसमाम्नायमुपदिष्टवान् । तस्मिन् वर्णसमाम्नाये पाणिनिरनुबन्धं स्थापयित्वा चतुर्दशसूत्रेषु विभज्य तानि चतुर्दशसूत्राण्यादाय प्रत्याहारान् निर्माय एतन्मूलकानि एकोनाशीत्युत्तरनवशताधिकं त्रिसहस्रं सूत्राणि रचितवान् । तेषां सूत्राणां संग्रहोऽष्टाध्यायीनामको ग्रन्थो वर्तते । स ग्रन्थ अत्यन्तं वैज्ञानिकः, गणितीयसूत्रमिव लघुव्यवहारोपयोगी वेदोपयोगी च वर्तते ।

केचिद् महेश्वरप्रसादात् प्राप्तत्वादेव चतुर्दशसूत्राणि माहेश्वरसूत्राणि अपि कथ्यन्ते इति वदन्ति । उक्तञ्च नन्दिकेश्वरकृतकाशिकायाम्–

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्** (त्रिपाठी, शास्त्री, २०६७, पृ. १) ॥ इति ॥

इत्थं यथाकथञ्चिद्वा कुशाग्रबुद्धिं सम्प्राप्य भगवान् पाणिनिः स्वकीयकालात्पूर्वं रचितान् ग्रन्थान् वैदिकसंहिता अन्यशाखाग्रन्थान्, ब्राहृणग्रन्थान्, उपनिषदः, विभिन्नसम्प्रदायानां व्याकरणानि, न केवलं लौकिकोपयोगिनोऽपि तु वेदोपयोगिप्रातिशाख्यादींश्च सम्यगध्ययनमालोडनं च कृत्वा लौकिकवैदिकोभयविधभाषोपयोगिनीमष्टाध्यायीमरचयत् । इयमष्टाध्यायी ततः पूर्वेषां समेषां व्याकरणानां समन्वयात्मिका वर्तते । पाणिनिना व्याकरणे धातुपाठः, गणपाठः, लिङ्कानुशासनञ्चादयः ग्रन्था रचिताः । शिक्षा, जाम्बबतीविजयः, द्विरूपकोशश्चेत्यन्ये ग्रन्था अपि तेन लिखिता सन्ति (मीमांसक, ई. २०३०, पृ. २३६) ।

इत्थं लौकिक्यां वैदिक्यां च संस्कृतभाषायां व्याकरणग्रन्थानां रचनया अतुलनीयं योगदानं कृत्वा स्वकर्मार्जितं पुण्यलोकं गतवान् ।

**पाणिनेर्मृत्युः** पाणिनेर्मृत्युः सिंहस्य भक्षणेनाभवदिति पञ्चतन्त्र उल्लिखितप्राचीनश्लोके वर्तते । तद्यथा–

**'सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिने–**
**र्मीमांसाकृतमुन्मनाथ सहसा हस्ती मुनिं जैमिनीम् ।**
**छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्**
**अज्ञानावृतचेतसाममतिरुषां कोऽर्थस्तिरश्चां गुणैः** (मीमांसक, ई. २०३०, पृ. २३६) ॥

तत्पाणिनेर्मृत्योर्दिनञ्च त्रयोदशी तिथिरिति किंवदन्ती वर्तते । अतस्तद्दिनं कस्मिन् मासे वा पक्षे वा इत्यस्याज्ञानात् सर्वासु त्रयोदशीषु व्याकरणं नाधीयन्ते वैयाकरणाः ।

**पाणिनेर्योगदानसमीक्षणम्** संस्कृतभाषायाः संरक्षणे, संवर्धने च महर्षेः पाणिनेर्महत्त्वपूर्णं योगदानं वर्तते । विभिन्नाचार्याणां मतमतान्तरेषु अन्यतमस्य श्रेष्ठत्वस्वीकरणाय काठिन्यावस्थायां सर्वेषां विदुषां मतानां गहनाध्ययनं कृत्वा समन्वयेनाष्टाध्यायीं विरचय्य भाषायाः स्थिरीकरणेन भाषा परिवर्तनशीलाभवतीत्याधुनिकभाषाविज्ञानस्य नियममपि तिरस्कृतमिवाकरोत् । समग्रव्याकरणस्य सम्यग् ज्ञानाय तेन लिखितोऽष्टाध्यायीनामको ग्रन्थः पर्याप्तो वर्तते । यत्र प्रकृतिप्रत्ययौ कल्पयित्वा पदविभाजनस्य वैज्ञानिकी पद्धतिरप्यनेनैव प्रतिपादिता, या आधुनिकभाषाष्वपि प्रयुज्यते । उभयोपयोगित्वाल्लोके वेदे च पाणिनीयव्याकरणस्य महत्त्वं समानं दृश्यते । अत एवास्य व्याकरणस्य वेदाङ्गत्वं स्वीक्रियते । अस्य ग्रन्थस्य विषये अष्टाध्यायी जगन्माता इत्याद्युक्तिरपि प्रचलिता वर्तते लोके । पाणिनिर्धातुपाठः, गणपाठः, लिङ्गानुशासनम्, शिक्षा, जाम्बवतीविजयः, द्विरूपकोशश्चेत्यादीन् ग्रन्थान् विरचय्य संस्कृतभाषायां महद्योगदानमकरोत् । अष्टाध्यायी पाणिनेः प्रथितग्रन्थोऽस्ति । अत अस्य ग्रन्थस्य परिचयो दीयते-

***अष्टाध्यायी*** संस्कृतव्याकरणशास्त्रे पाणिनीयव्याकरणमियमष्टाध्यायी सर्वत्राधुना पठ्यते, पाठ्यते च । वैदिककालादेवारभ्य विक्रमादित्यसंवत्सरस्य चतुर्दशशतकपर्यन्तमनेकैराचार्यैर्लिखितान्यनेकानि व्याकरणान्यासन्, तेषु लौकिकवैदिकोभयोपयोगित्वात्, ततः पूर्वेषां समेषामाचार्याणां व्याकरणानां तत्सम्बन्धिग्रन्थानां च सूक्ष्माध्ययनमनुसन्धानं च कृत्वा प्रणीतत्वात्, अष्टाध्यायाः पद्धतेः सारल्याद्, वैज्ञानिकत्वात्, पूर्वेषामाचार्याणां विभिन्नमतमतान्तराणां समन्वयात्मकत्वाच्चेत्थं सर्वतोभावेन ततः पूर्वं कैरपि अकृतप्रयासत्वात्, सर्वेषामुपयोगित्वात्, सर्वोपनिषदां सारो यथा श्रीमद्भगवद्गीता तथैव पाणिनीयव्याकरणस्य सर्वेषां व्याकरणानां सारभूतत्वाच्चास्य प्रभावादन्यानि सर्वाणि व्याकरणानि लुप्तप्रायाण्यभवन् । इदमेव पाणिनीयव्याकरणं सर्वोपरि राजते । नैरुक्तसम्प्रदायस्याप्युपयोगित्वेन वेदोपयोगित्वादिदं वेदाङ्गमपि कथ्यते ।

इयं व्याकरणस्मृतिः सूत्रेषूपनिबद्धा वर्तते । तानि सूत्राण्यपि 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति न्यायादल्पाक्षराणि सन्ति (मिश्र, २०१४, पृ. २७८) । सूत्रेष्वदृष्टानि पदानि यथावश्यकं सूत्रान्तरादनुवर्तन्ते ।

अस्मिन् व्याकरणे अष्टावध्यायाः सन्ति । अत एवास्य नामापि अष्टाध्यायीति जाता । प्रत्यध्यायं चत्वार पादाः सन्ति । तत्र–प्रथमाध्याये संज्ञासूत्राणि परिभाषासूत्राणि च वर्तन्ते ।द्वितीयाध्याये विभक्त्यर्थाः, समासाश्च निरूपिताः । तृतीयाध्याये धातुभ्योः विहितानां कृत्प्रत्ययानां विवरणं वर्तते । चतुर्थाध्याये पञ्चमाध्याये च तद्धितप्रत्ययानां विवरणं वर्तते । षष्ठाध्याये प्रकृतिसम्बन्धिकार्यं,तिङ्निरूपणं, सन्धिनिरूपणं, स्वरनिरूपणं च कृतम् । सप्तमाध्याये अङ्काधिकारीयकार्याणि, प्रत्ययसम्बन्धिसर्वाणि कार्याणि च निविष्टानि । अष्टमाध्यायस्य प्रथमे पादे द्वित्वविधायकानि सूत्राणि समाविष्टानि ।द्वितीयपादादारभ्य चतुर्थपादपर्यन्तं द्वित्वस्वरसन्धिणत्वादिकार्याणि निरूपितानि । पूर्वत्रासिद्धम् ८।२।१ इत्यधिकारादिदं प्रकरणमसिद्धप्रकरणमपि कथ्यते (पाण्डेय, ई. २०१२, प्राक्कथनम्) ।

अष्टाध्याय्यां प्राच्योदेच्यदाक्षिणात्यभेदेन त्रिधा पाठभेदाः दृश्यन्ते । तत्र प्राच्यपाठानुसारेण काशिकावृत्तिर्लिखिता वर्तते । अस्यापरं नाम बृहत्पाठ इत्यप्यस्ति । उदीच्यस्तु पाठभेदः काश्मिरदेशे चर्चितः पाठः मन्यते । लघुपाठनाम्नापि ज्ञायते अयं पाठः । तस्य दाक्षिणात्यपाठाधारेण कात्यायनेन वार्त्तिकानि लिखितानि । दाक्षिणात्येऽपि लघुबृहत्पाठौ प्राप्येते (मीमांसक, ई. २०३०, पृ. २२०)।

***अष्टाध्याय्या विशेषता:*** पूर्वैराचार्यैर्लिखितेषु व्याकरणेषु मतभिन्नतासत्वेऽपि पाणिनेर्लिखिते व्याकरणे सर्वेषां व्याकरणानां समन्वयं दृश्यते । यथा नैरुक्त–शाकटायनसम्प्रदाययोरनुसारेण सर्वे संज्ञावाचकाः शब्दा धातुत एव कृत्प्रत्ययं विधाय निर्मिता मन्यन्ते । परं गार्ग्यसम्प्रदायस्य तथान्येषां सम्प्रदायानां च मते सर्वेषां संज्ञावाचकशब्दानां यथाकथञ्चित् प्रकृतिप्रत्ययविभागकल्पनेन विभाजनं नोचितम् । पाणिनिना तु नैरुक्त–शाकटायसम्प्रदाययोश्च समन्वयार्थं उणादिसूत्राण्यपि रचितानि । पाणिनेः पूर्वं वैदिकोपयोगिव्याकरणं भिन्नं लौकिकोपयोगि व्याकरणं च भिन्नमासीत्। परं पाणिनीयं व्याकरणं लौकिकोपयोगि वैदिकोपयोगि च वर्तते । पाणिनेरष्टाध्याय्या उपजीव्यग्रन्थ आपिशलं व्याकरणमस्ति । यतो हि–पाणिनीयव्याकरणस्य आपिशलव्याकरणस्य च सूत्राणां कतिपयानि स्वरूपाणि प्रायशः समानानि दृश्यन्ते । पाणिनीयं व्याकरणं सूक्ष्मं, संक्षिप्तं, प्रयोगसरलञ्च वर्तते ।

इदं व्याकरणं संस्कृतभाषायाः कृते रचितमप्यस्य नियमपद्धतिः सर्वासु भाषासूपयोगिनी वर्तते । अत्र ध्वन्युत्पादनप्रक्रियाया वर्णनम्, ध्वनेर्वर्गीकरणम्, सुबन्ततिङन्तस्वरूपेण सारल्येन पदविभाजनम्, प्रकृतिप्रत्ययावाधारीकृत्य पदविभाजनञ्च कृतं वर्तते ।

**अष्टाध्याय्या व्याख्याग्रन्थाः** अष्टाध्याय्याः सूत्राणां व्याख्याने द्विधा प्रणाली प्रचलिता वर्तते । सूत्रक्रमानुसारिणी प्रक्रियाक्रमानुसारिणी च । तत्र पूर्वमष्टाध्याøयाः सूत्रक्रमानुसारिव्याख्यानस्यैव परम्परा प्रचलितासीत् । तस्मिन् क्रमे पूर्वमष्टाध्याय्याः समग्रसूत्राणां कण्ठस्थीकृते एव तेषां पौर्वापर्यज्ञानं संभवति । तत्र 'सुध्युपास्यः' इत्यस्य सिद्धये इको यणचि (६।१।७७) इति षष्ठाध्यायस्थसूत्रेण यणादेशे कृते धकारस्य द्वित्वे कर्तव्ये, तद्विधायकस्य अनचि च (८।४।४७) इत्यस्य, एवं स्थानिवद्भावे अचः परस्मिन् पूर्वविधौ (१।१।५७) इत्यस्य, न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु (१।१।५८) इत्यस्य च, एवं जश्त्वसंयोगान्त–लोपनिषेधादिकार्ये च कर्तव्ये पृथक् पृथक्स्थानस्थितानां सूत्राणां युगपदावश्यकतया सूत्रक्रमानुसारिपठनपाठनक्रमे अध्येतृभिरध्यापकैश्च क्लेशोऽनुभूतः । अत शनैः शनैर्विदुषां प्रक्रियाक्रमानुसारिव्याख्याने मनः प्रवृत्तम् । इत्थमष्टाध्याय्या द्विधा व्याख्यानप्रणाली जाता ।तयोः प्रणाल्योरधोलिखिताः ग्रन्था रचिताः सन्ति । सूत्रक्रमानुसारिव्याख्याने व्याडिकृतो वृत्तिग्रन्थः, वार्तिकानि, पातञ्जलमहाभाष्यम्, काशिका च वर्तन्ते । तथैव प्रक्रियाक्रमानुसारिव्याख्याने रूपावतारः (पूवार्धम्, उत्तरार्धञ्च) प्रक्रियाकौमुदी, वैयाकरणसिद्धान्तकौमुदी, मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी च सन्ति ।

प्रकृतपरिचयेन, पाणिनिकृत्येन च पाणिन्यवदानमनुमातुं शक्यते । अष्टाध्यायीग्रन्थः पाणिनेर्मुख्यरचना वर्तते । अष्टाध्याय्यां अष्टाध्यायाः सन्ति, अतः अष्टाध्यायीतिनाम्ना सम्बोध्यते । तत्र प्रत्यध्याये चत्वारः पादाः सन्ति । अयं सूत्रात्मकग्रन्थोऽस्ति । अन्ये च पाणिनिशिक्षा-गणपाठ-लिङ्गपाठ-उणादिपाठ-जाम्बवतीप्रभृतयः ग्रन्थाश्च सन्ति । तथापि

अष्टाध्याय्याश्चर्चा बहुत्र विशेषरूपेण भवति। यतोहि पाणिनीयसूत्राण्याधारीकृत्यैव विविधाः स्थूलग्रन्थाश्च रचिताः सन्ति। सूत्राणां विवेचनम्, विमर्शनम् अध्ययनञ्च नानादृशा सञ्जातमस्ति। तेषां सूत्राणामेव सूत्रानुसारिव्याख्याप्रकृयानुसारिव्याख्या च कृता विद्यते। संस्कृतप्रवेशिनोऽपि विद्यार्थिनः पाणिनिव्याकरणादेव प्रवेशकक्षां समारभन्ते। आदौ महेश्वरप्रसादाप्नानि अइउणित्यादीनि चतुर्दश सूत्राणि पाणिनिना प्रदत्तानि सन्ति। तत एव प्रत्याहारनिर्माण-वर्णोच्चारण-स्थान-प्रयत्नादीनां चर्चा अग्रे गता विद्यते। वरदराजाचार्यभट्टोजिदीक्षितनागेशप्रभृतिभिः नवविद्वद्भिः सूत्राणां नवशैल्या व्याख्या चर्चा च कृता। अष्टाध्याय्यां केवलं सूत्राण्येव पठनेन सूत्रबोधाय सारल्यं नास्ति, परन्तु तेषां सूत्राणां विस्तरशः व्याख्यानेन सूत्रज्ञानं सुकरं दृश्यते। पाणिनिः क्वचित् सूत्रद्वारा समाजदर्शनस्य विचारान्नपि प्रस्तुतवान्। वृद्धिपदेन पाणिनिना मङ्गलमिति उल्लिखिम्। क्वचित् सूत्रेषु ऋतो भरद्वाजस्यप्रभृतीनां सूत्राणां स्थापनेन पूर्वाचार्याणां सम्मानं करणीयमिति ज्ञानं प्रदत्तमस्ति। तथैव संहितासंयोगलोपगुणविविधसंज्ञाद्वारा अपि सृष्टेः प्रकृयाविषये चिन्तनं कृतं विद्यते। समाजपक्षतोऽपि पाणिनीयसूत्राणि सार्थकानि मन्यन्ते। पाणिनेः ग्रन्थाश्च बहवः सन्ति कात्यायनस्यापेक्षया पतञ्जलेरपेक्षया च। व्याकरणस्य सूत्रारम्भश्च पाणिनेरभूदतः पाणिनेरवदानं विशिष्टतमं मन्यते।

**कात्यायनः**

> **उक्तानुक्तद्विरुक्तानां चिन्ता यत्र प्रवर्तते।**
> **तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः ॥**

लक्षणलक्षितस्य वार्तिकस्य कारकत्वेन स्मृतोऽयं कात्यायन नामको दाक्षिणत्यो महान् वैयाकरणो मुनित्रितये प्राध्यानम्भजमानः सूर्यं इव व्याकरणाकाशे दृश्यते (गौड, २०५५,पृ.१४२) । पाणिनीयव्याकरणे यावन्ति वार्तिकानि लिखितानि, तेषु कात्यायनस्य पाठ एव सुप्रसिद्धो वर्तते व्याकरणशास्त्रे। पतञ्जलेराचार्यस्य व्याकरणमहाभाष्ये प्रामुख्येन कात्यायनीयवार्तिकाणामेव व्याख्यानमस्ति। पतञ्जलिना व्याकरणमहाभाष्ये न स्म पुरानद्यतन इति ब्रुवता कात्ययनेनेह इति उक्तमस्ति। अनेन कथनेनापि कात्यायनस्य सर्वोत्कृष्टता प्रतिभाति।

कात्य–कात्यायन–पुनर्वसु–मेधाजित्–वररुचीत्यादिशब्दैः कोविदोऽयं प्रसिद्धो वर्तते । तत्र कात्येति नाम गोत्रप्रत्ययान्तम्, कात्यायनेति नाम युवप्रत्ययान्तञ्च वर्तते। पुनर्वसुः इति नाम नाक्षत्रं वर्तते। वररुचीति नाम सर्वथा बहुस्थलेषु विशेषतो महाराजसमुद्रगुप्तस्य कृष्णचरिते स्वर्गारोहणकाव्यस्य कर्तृत्वेन स्मृतोऽस्ति। लब्धबहुनामानोऽपि कात्यायनानाम्ना सर्वतः ग्रन्थादिषु परिचीयते। महाभाष्ये पस्पशाह्निके "यथालौकिवैदिकेषु" इति वार्तिके यथा लाके वेदेचेति प्रयोक्तव्ये लौकिवैदिक इति प्रयोगात् प्रियतद्धिताः दाक्षिणत्याः यथालोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेषु इति प्रयुज्यते इति कथनेन दाक्षिणात्योऽयं ब्राह्मणेति सिद्ध्यति।

वार्तिककारः कात्यायनः यदि याज्ञवल्क्यपौत्रः स्वीकृयते तर्हि सः पाणिन्यपेक्षया किञ्चिदुत्तरवर्ती भविष्यति। यदि सः पाणिनेः साक्षात् शिष्य आसीत् तर्हि सः पाणिनेः समकालिकः (गौड, २०५५, पृ. १४३) अतो वार्तिककारस्य

कात्यायनस्य कालः विक्रमसंवत्सरात् प्रायशः २९००–३००० (एकोनत्रिंशत्–त्रिंशत्तमशकतकवर्षपूर्वमेव भवितुमर्हति इति विदुषां मतानि दृश्यन्ते।

वार्तिककारेण कात्यायनेन यथोत्तरं मुनीनां प्रामाण्यम् इति वैयाकरणप्रसिद्धवाक्यानुसारं पाणिन्यपेक्षया प्रामाण्यमधिकमस्ति । एतस्य मुख्यं कृत्यम् – अष्टाध्याय्याः सूत्राण्याधारीकृत्य वार्तिकपाठात्मकग्रन्थस्वरूपं वर्तते । पतञ्जलिनाऽप्येतदीयवार्तिकान्याधारीकृत्य स्वकीयं महाभाष्यमपि प्रणीतम्।

सम्पूर्णः वार्तिकपाठः सम्प्रति नोपलभ्यते। अतः संख्या तेषां निश्चेतुं न शक्यते। कात्यायनस्य प्रथमवार्तिकविषये विद्वत्सु वैमत्यमवलोक्यते। केचन सिद्धे शब्दार्थसम्बन्धे इति वार्तिकं कात्यायनस्य प्रथमवार्तिकं मन्यन्ते। महाभाष्ये उक्तमस्ति यत् – मांगलिक आचार्यो महत शास्त्रौघस्य मंगलार्थम् सद्धिशब्दमादितः प्रयुङ्क्ते।"

अत्र "आदि" पदं न मुख्यार्थवाचकम्, अतः रक्षोहागमलघ्वसन्देहाः प्रयोजम् इत्येव प्रथमवार्तिकमिति युधिष्ठिमीमांशकः स्वीकरोति।

राजशेखरेणाऽप्युक्तम् –

**यथार्थता कथं नाम्नि मा भूद् वररुचिरिह।**
**व्यधत्त कण्ठाभरणं यः सदारोहणप्रियः ।।**

इति वचनेनाऽपि कात्यायनस्य पूर्वं काव्यकर्तृत्वं प्रसिद्ध्यति भ्राजा नाम श्लोका अपि वार्तिककारस्य रचनेति कैयटहरदत्तनागेशभट्टादिभिर्मन्यन्ते। यस्तु प्रयुङ्क्ते कुशलो विशेषे इत्यादयो महाभाष्यस्था श्लोकाः भ्राजश्लोकसंग्रहस्था एव। अयं कात्यायनस्मृतिरप्युपलभ्यते। मद्रासविश्वविद्यालयप्रकाशितः अभयसारिका भाण इति ग्रन्थोऽपि कात्यायनस्येति केचन मन्यन्ते, परन्तु स वार्तिककारकात्यायनस्य नैवेति युधिष्ठिरस्य मीमांशस्य मतमपि वर्तते।

त्रिमुनिव्याकरणमित्यनुसारेण त्रिषु एकस्य कात्यायनस्य समयः युधिष्ठिरमीमांसकविरचितव्याकरणशास्त्रस्येतिहासानु- सारेण विक्रमसंवत्सरात् (२७००) वर्षपूर्वं वर्तते । केषाञ्चिन्मते ख्रीष्टाब्दात् (४००) वर्षपूर्वं वर्तते । लघुशब्देन्दुशेखरानुसारेण कात्यायनः पाणिनेः शिष्य आसीत् । तेन अष्टाध्याय्युक्तानुक्तदुरुक्तविवेचनपूर्वकं वार्तिकानि पाणिनेः सूत्रेषु कुत्रचिदपूर्णतामनभूय लिखितानि । अपूर्णता च पाणिनेः समयात् पश्चात् कात्यायनस्य समये भाषायाः परिवर्तनेन, तत्काले प्रयुक्तानां शब्दानामपि पाणिनीयव्याकरणस्य नियमे समावेशार्थमथवा पाणिनेर्दृष्टिर्यत्र न गता तत्रापि नियमाय कात्यायनेन वार्तिकानि विलिख्याष्टाध्याय्याः परिपूरकत्वेन स्थापितानि।

***कात्यायनस्यावदानसमीक्षणम्*** कात्याययनः विशेषतः वार्तिककारेण परिचीयते। यद्दृष्टमदृष्टं वा सूत्रकारेण तत् स्फुटम् । वाक्यकारो ब्रवीत्येवं तेनादृष्टञ्च भाष्यकृत् (आचार्य, सन् २०१३, भूमिका) । पद्येऽस्मिन् वाक्यकारेति नाम्ना कात्यायनः ज्ञायते । वररूचिवाक्यकारवार्तिकारादिशब्दैः कात्यायनः परिचीयते । पाणिनिना सूत्रनिर्माणं कृतम्, ततः

कात्यायनेन सूत्रेऽदृष्टमवशिष्टं विस्मृतं वा कात्ययनेन विलिखितम्, ततः कात्यायनपाणिन्योरभावं पतञ्जलिना महाभाष्यं विरचय्य पूर्णं कृतमिति आशयो वर्तते। पाणनीय व्याकरणसमृद्धये कात्यायनस्य महती भूमिका वर्तते। व्याकरणस्य दार्शनिकपक्षोऽपि अनेन विकसितः कृतः। वार्तिककारस्य कात्यायनस्य प्रथमवार्तिकं 'सिद्धे शब्दार्थसम्बन्धे' इति अस्ति। दार्शनिकत्वेन वाक्यकारत्वेन च कात्ययनस्य नाम अग्रे आयाति। कात्यायनस्य दृष्टिः प्रायशः प्रत्येकदर्शनेषु गता अस्ति। कात्यायनेन क्लिष्टव्याकरणं लोकविज्ञानेन साकं युक्तम्। व्याकरणदर्शने अवयवअवयवीभावसम्बन्धः अधिकरणादौ लोकविज्ञानसम्बद्धं वर्तते। कात्यायनः उत्सर्गापवादप्रतिषेधनिपातनस्थान्यादेशलिङ्गदीनां सामान्यविशेषप्रकारेण स्वस्य व्याख्यानपद्धतिं दार्शनिकरूपं ददौ। अस्मिन् विषये महाभाष्यकारकात्यायनयोः मतभेदो दृश्यते। कात्यायनः प्रकृतिप्रत्ययविशेषणवादप्रत्ययविशेषणवादसामानाधिकरण्यवादाथनियमवादादीन् व्याकरणे समाविष्टवान्। उक्तवादानुसारि पाणिनीयसूत्राणां व्याख्यानञ्च कृतम्। प्राचीनवैयाकरणः दार्शनिकः हेलाराजऽपि वार्तिकानि अधीतवान्। वार्तिकानि अधीत्य 'वार्तिकमेष' इति ग्रन्थश्च लिखितः। हेलाराजः भर्तृहरेः वाक्यपदीयस्य प्रकीर्णककाण्डे नानावार्तिकानि स्मृतवान्। चान्ते संस्कृतव्याकरणे संस्कृतवाङ्मये संस्कृतभाषाक्षेत्रे च कात्यायनस्य अतुलनीयं योगदानं वर्तते।

सिद्धे शब्दार्थसम्बन्धे इति कात्यायनस्य प्रथमवार्त्तिकं चर्चितवार्त्तिकञ्च मन्यते। कात्यायनस्य एक एव ग्रन्थोऽपलभ्यते। तथापि पाणिनीयसूत्राणां विवेचनेन कात्यायनस्य महद्योगदानं द्योतते। महाभाष्ये अपि कात्यायनवार्त्तिकानि सन्ति, तेषां व्याख्यानं भाष्यकारेणापि कृतमस्ति। वार्त्तिकसाहाय्येन भाष्यकारेण स्वविषयः सम्पादितो विद्यते। पाणिनीयसूत्राबोधे सति कात्यायनस्य वार्त्तिकद्वारा अपि सूत्रस्य गूढार्थः लभ्यते। यथा पाणिनिना सूत्रं परिचाय्य सूत्रद्वारा नानाप्रयोगाणां सिद्धिः कृता वर्तते तथैव कात्यायनेनापि रूपसिद्धिप्रकृया साधिता विद्यते। पाणिनीयसूत्रविवेचनाय, अतिरिक्तज्ञानाय च कात्यायनस्यावदानं विशिष्टतरं मन्यते। अल्पकृत्यमस्ति, तथापि मूल्यवदस्ति।

**पतञ्जलिः** महामुनिना भगवता पतञ्जलिना हि पाणिनीयसूत्राणां याऽत्युत्कृष्टा व्यवहारोपयोगिनी व्याख्या कृता सा संस्कृतजगति महाभाष्योति नाम्ना व्यपदिश्यते अत्र व्यकरणस्य शुष्कविषया एवंविधया सरसया सरलया सरण्योपस्थापिताः, यां मुक्तकण्ठं प्रशंसन्ति सर्वे विद्वांसः। अस्य रचनासौष्ठवं संस्कृतवाङ्मयेऽपूर्वमस्ति मञ्जुलम्। वस्तुतो महाभाष्यमेतन्न केवलं पाणिनीयव्याकरणेऽतिमहत्त्वाधायकमस्ति अपितु समस्ते संस्कृतवाङ्मये इदमेकमद्भूतं प्रामाणिकं ग्रन्थरत्नमस्ति। सर्वे वैयाकरणा एतस्य समक्षं नतमस्तकाः भवन्ति, महाभाष्ये हि प्रायः पाणिनीयसूत्राणां प्रत्येकपदानां सोदाहरणं विवेचनं कृतं विद्यते। वैयाकरणा हि सूत्रवार्तिकभाष्येषु परस्परविरोधे महाभाष्यमेव प्रामाणिकं मन्यन्ते। वस्तुतः महाभाष्ये भगवता पतञ्जलिना सूत्राणामेव व्याख्यानं कृतमस्ति परन्तु शैली विचित्रा वर्तते, यतोहि ग्रन्थकृता प्रश्नोत्तरात्मकशैल्या सोदाहरणं तदपि रुचिकरविधिना विवेचनं कृतमस्ति। महाभाष्यग्रन्थं प्रति गतः कोऽपि जनः ज्ञानं विना न प्रत्यावृत्तः इति मे मतिः। अद्यत्वे पाणिनीयव्याकरणस्य यादृशी प्रतिष्ठा यथा वा शास्त्रेषु मुख्यं स्थानं गण्यते, सोऽयं भगवतः पाणिनेः, कात्यायनस्य, पतञ्जलेश्च प्रभावः। पतञ्जलिकृतं महाभाष्यं न केवलं व्याकरणस्यैव निबन्धः, किन्त्वत्र सर्वं ज्ञातव्याः विषयाः, लौकिका व्यवहाराः, प्राक्तना इतिहासा आवश्यकाः धर्माः दर्शनानां सिद्धान्ताः, गूढतमानि विज्ञानानि च तत्र तत्र सपरिकरं विवेचितानि। वैज्ञानिका यमाकर्षणसिद्धान्तं न्यूटनेनाऽविष्कृतं मन्यन्ते। स तु भगवता पतञ्जलिना स्थानेऽन्तरतमः १।१।५० इति सूत्रभाष्ये बहुपूर्वमेव समुद्घोषितः।

भगवतः पतञ्जलेः नामविषयेऽवैमत्यं दृश्यते। विभिन्नषु प्राचीनेषु ग्रन्थेषु पतञ्जलेराचार्यस्य गोनर्दीय–गोणिकापुत्र–नागनाथ–अहिपति–फणिभृत्–शेषराज–शेषाहि–चूर्णिकारप्रमृतीनि नामान्तराणि समुपलभ्यन्ते । वैजयन्तीकोषकारो गोनर्दीयशब्दं पतञ्जलेर्नामान्तररूपेण स्वीकरोति (प्रकाशाचार्य, २०८, पृ.९६) । तथैव पतञ्जलेः महाभाष्येषु विभिन्नेषु स्थानेषु गोनर्दीयशब्दप्रयोगः समुल्लिखितो दृश्यते। तथाहि– 'गोनर्दीयस्त्वाहसत्यमेतत्, सति त्वन्यस्मिन्निति' । एवञ्चापरत्र 'त्वत्कपितृको मकत्पितृका इत्येव भवितव्यमिति इत्थं महाभाष्ये बहुषु स्थलेषु गोनर्दीयशब्दप्रयोगोऽस्ति।

पतञ्जलिप्रादुर्भावकालविषयेऽपि निश्चयो नास्ति । विदुषां ग्रन्थेषु मतेषु चैकता न दृश्यते । अस्य कालनिर्णये अनेकाः सहायिकाः सामग्र्य उपलभ्यन्ते तथाहि– अनुशोणं पाटलिपुत्रम्, जेयो वृषलः,काण्डीभू तं वृषलकुलम् कुड्यीभूतं वृषलकुलम् । इत्थं महाभाष्ये पतञ्जलिकालज्ञानाय दशाधिकप्रमाणानि प्राप्यन्ते । अत्र प्रथमोद्धरणे पाटलिपुत्रस्योल्लखोऽस्ति । महाभाष्ये पाटलिपुत्रस्य नामाऽनेकधा प्रयुक्तम् । तथैव द्वितीये तृतीयोद्धरणे च वृषल–वृषलकुलयोर्निर्देशोऽस्ति । द्वितीये उद्धरणे वृषलो 'जेय' उक्तः । तृतीये उद्धरणे कस्यचिन्महतो वृषलकुलस्य कुड्यवत् अतिसङ्कीर्णतायाः सङ्केतोऽस्ति । मुद्राराक्षस नामाभिधेये नाटके चाणक्यश्चन्द्रगुप्तं प्रायो वृषलेति नाम्ना सम्बोधयति । सम्प्रति वृषलशब्दस्य शूद्र इत्यर्थोऽवबुद्ध्यते। शूद्राश्चवरवर्णाश्चवृषलाश्च जघन्यजाः (शर्मा, २०६५, पृ. २०१)। अमरकोषे शूद्रवर्गेषु शूद्रस्य चत्वारनिमानि सन्ति। तत्रापि वृषल शब्देन शूद्रेति सङ्केतः कृतो वर्तते।

महाभाष्यकारेण स्वजीवने कति ग्रन्थाः लिखिताः ? कति च टीकाः, व्याख्याश्चेति विषये न कश्चिन्निश्चयो दृश्यते। तथापि निदानसूत्रम्, योगसूत्रम्, महाभाष्यञ्चेति ग्रन्थाः पतञ्जलिनैव लिखिताः ग्रन्थाः सन्ति। मुख्यतया एतेषां ग्रन्थविषये सर्वत्र प्राप्तुं शक्यते। कृष्णचरितस्य पूर्वकार्यसमीक्षणे महानन्दनामकस्य महाकाव्यमिति रचितमिति प्राप्यते। तथैव बहुषु टीकास्वपि शेष इति नाम पठ्यते, अतः बहुटीकानामपि कर्तृत्वेनास्य नाम समायाति। कोषेषु अपि शेषनाम्ना पतञ्जलिना कोषग्रन्था अपि रचिताः सन्तीति अनुमातुं शक्यते।

महाभाष्यवैशिष्ट्यमपि विचित्रं शैली च विचित्रा विद्यते। स्वातन्त्र्येण सूत्राणि क्वचिदेव व्याख्यातानि सन्ति। अन्यशास्त्रभाष्यापेक्षया व्याकरणमहाभाष्ये इदमस्ति वैलक्ष्यण्यम्। मङ्गलशब्दः मङ्गलकारो भवति, सर्वे मानयन्ति अपि। मङ्गलशब्दप्रयोगशैली च अत्र दृश्यते यत्– वृद्धिरादैच् १।१।१ (पाठक, २०००, पृ. १) इति सूत्रे वृद्धिपदेन सूत्रकृता पाणिनिना मङ्गलं कृतम्, सिद्धे शब्दार्थसम्बन्धे (शास्त्री, २०१७, पृ.२२) इत्यत्र सिद्धपदेन वार्तिककृता मङ्गलं विहितम्, तथैव अथ शब्दानुशासनम् (शास्त्री, २०१७, पृ. १) इत्यत्र अथ शब्देन भाष्यकृता मङ्गलमनुष्ठितम्। महाभाष्ये यद्यपि प्रधानतया कात्यायनीयवार्तिकानामुल्लेखो विद्यते, तथापि तत्राऽन्येषामपि वार्तिककाराणां वार्तिकानि समृद्धृतानि सन्ति। महाभाष्ये सूत्रवार्तिकाणां सोदाहरणं सतर्कं सूत्रार्थसूत्रानुसारि वाक्यवार्तिकस्थपदानां व्याख्यानं कृतमस्ति, अतः महाभाष्यं ज्ञानरत्नं मन्यते। एवञ्च पातञ्जलमहाभाष्यं व्याकरणशास्त्रस्यैव मान्यो ग्रन्थो विद्यते।

पतञ्जलेः कालो वैक्रमाब्दात् (१२००) वर्षपूर्वं इति युधिष्ठिरमीमांसकानुसारेण। केषाञ्चिन्मते ख्रीष्टाब्दात् (२००) वर्षपूर्वं वर्तते । तस्य पतञ्जलिः, गोनदीर्य गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, चूर्णिकारः, पदकारश्चेति नामानि प्रचलितानि सन्ति। तस्य जन्मस्थानं तु गोनर्द आसीदित्यस्य गोनर्दीयस्त्वाह इति भाष्यमेव मानम्। अष्टाध्याय्या व्याख्याने

महाभाष्यमेवाधुना सर्वोत्कर्षेण वर्तते । व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् इति नागेशपरिभाषानुसारमपि व्याख्यानेष्वपि महाभाष्यव्याख्यानस्यैव सर्वे विद्वांसः शरणं गच्छन्ति। महाभाष्यस्य परिभाषेत्थमुक्ता च –

**सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः** (मिश्र, २०१२, प्राक्कथनम् )॥

सूत्रक्रमानुसारिव्याख्याने शेषावतारेण भगवता पतञ्जलिनेदं रचितम् । पाणिनिना लिखिताया अष्टाध्याय्या उक्तानुक्तदुरुक्तविवेचनपूर्वकं कात्यायनेन वार्तिकेषु लिखितेष्वपि पतञ्जलिना महाभाष्ये विरचित एव व्याकरणेन पूर्णता प्राप्ता। अत एव त्रिमुनिव्याकरणमित्युक्तिर्जगति प्रसिद्धा वर्तते। अस्मिन् महाभाष्ये भगवता पतञ्जलिना पाणिनेः सूत्राणां सर्वत्र सार्थकत्वविवेचनपूर्वकं क्वचित् प्रत्याख्यानमपि कृतम् । व्याकरणस्य परम्परायां उत्तरोत्तराचार्याणां प्राबल्यं स्वीक्रियते । उक्तञ्च– 'यथोत्तरं मुनीनां प्रामाण्यम् इति । इत्थं महाभाष्ये केषाञ्चित् सूत्राणां पदानां वा पतञ्जलिना प्रत्याख्यानेऽपि 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् इत्युक्त्या तस्य अदृष्टप्रयोजनं स्वीक्रियते, व्याकरणस्य वेदाङ्गत्वात्।

***पतञ्जलेर्योगदानसमीक्षणम्*** संस्कृतव्याकरणस्य महाभाष्यमरचयत् महद्योगदानमस्य । भाष्ये सुन्दरशैल्या सूत्राणां व्याख्यानं कृतमस्ति। संवादशैल्या सतर्कं सोदाहरणं गाम्भीर्यं महाभाष्ये वर्तते। एवञ्च सामवेदीयनिदानसूत्रं योगसूत्रञ्च रचितवान्। क्वचित् सामवेदस्य पातञ्जलशाखायाः निर्देशोऽपि लभ्यते। योगसूत्रमपि पतञ्जलेः विपुलं कार्यमस्ति। अद्यापि आविश्वं योगसूत्रमनुसरन्ति सर्वे। योगसूत्रस्य भाष्ये अस्य मतानि सन्ति। साङ्ख्यकारिकायाः युक्तिदीपिकायाः टीकायां साङ्ख्यसिद्धान्तविषयकानेकमतानि प्राप्यन्ते। आयुर्वेदस्य चरकसंहिता अपि पतञ्जलिपरिष्कृतेति मन्यते। समुद्रगुप्तस्य कृष्णचरित्रानुसारं पतञ्जलिना चरकसंहितायां धर्माविरूद्धयोगानां सन्निवेशः कृत इति मतं प्राप्यते । चक्रपाणिपुण्यराजभोजदेवप्रभृतयोः महाभाष्यस्य योगसूत्रस्य चरकसंहितायाश्च कर्ता एक एवेति मन्यन्ते। अनया रीत्या पतञ्जलेर्योगदानं व्याकरणस्येतिहासानुसारं बहुत्र प्राप्यते परन्तु कुत्रापि निश्चितिः न प्राप्यते । एतेषां विदुषां विषये मतवैविध्यमेव प्राप्यते । महाभाष्यायोगसूत्रे तु अनेनैव लिखिते । सरलशैल्या सरसतया विषयप्रतिपादनशैल्या समासशैल्या च महाभाष्यमस्य आदर्शरूपग्रन्थो मन्यते । महाभाष्ये नैकविधटीकाः व्याख्याश्च सम्भूताः सन्ति । क्लिष्टशुष्कग्रन्थमपि सुकरं सुबोध्यं कृत्वा पतञ्जलिना संस्कृतव्याकरणाशास्त्रे उत्कृष्टता संस्थापिता विद्यते। चान्तेऽस्य योगदानं व्याकरणशास्त्रे स्मरणीयमनुकरणीयञ्च वर्तते।

पाणिनिना सूत्राणामेव रचना कृता, कात्यायनेन एकेनैव वार्त्तिकग्रन्थलेखनेन पाणिनीयसूत्राणां निजशैल्या ख्याकृतम् । परन्तु पतञ्जलिना तेषां सूत्राणां विश्लेषणम्, विवेचनम्, विस्तृतव्याख्यानञ्च कृतम्, येन सूत्रबोधे सूत्रविवेचने सुकरं दृश्यते । महाभाष्यग्रन्थस्य व्याख्याशैल्या अध्ययनस्य वादविवादशैल्याश्च नूतनाध्ययनसंस्कारः व्युत्पादितो वर्तते । कदाचिद् दुर्बोध्यमपि अनुभूयते पातञ्जलमहाभाष्यम्, परन्तु बालानां कृते दुर्बोध्यं भवेत्परन्तु प्रौढानां कृते लाभदायकं सुबोध्यञ्च दृश्यते। महाभाष्यप्रवेशाय व्याकरणस्य आधारभूतग्रन्थाः प्रवेशग्रन्थाश्च पठनीयाः भवन्ति। पतञ्जलेरवदानं व्याकरणचिकित्सायोगक्षेत्रेषु दृश्यते, अतः बहुविषयकं पतञ्जलेर्योगदानं विशिष्टतमं दृश्यते।

**उपसंहारः**

त्रिमुनीति नाम्ना पाणिनिकात्ययनपतञ्जलय आयान्ति। संस्कृतव्याकरणशास्त्रे एतेषां मुनीनां महद्योगदानं दृश्यते। मुनित्रयस्य व्याकरणपद्धत्या व्याकरणपरम्परा समृद्धा सञ्जाता विद्यते। बालानां कृते वृद्धानां कृते संस्कृतजिज्ञासूनाञ्च कृते

फलदायिनी जाता विद्यते । बालप्रवेशाय वृद्धानां कृते विवेचनाय दार्शनिकप्रवचनाय च व्याकरणस्य स्थानं वर्तते । तेन मुनित्रयस्य मार्गः समेषां कृते श्रेयस्करमस्ति । मुनित्रयस्य अवदानेन अध्येतारः संस्कृतजगतः ज्ञानागारश्च सम्पन्नः सञ्जातः । पाणिनिना सूत्रात्मकाष्टाध्यायीग्रन्थः संरचितः । तस्य सूत्राणां वाक्यकारेण कात्यायनेन विवेचनं कृतम् । ततः प्रत्येकपदानां सतर्कं सोदाहरणं विशदीकृतवान् महाभाष्यकारः पतञ्जलिः । पाणिनेः, पतञ्जलेः कात्यायनस्य च अन्ये ग्रन्थाश्चोपलभ्यन्ते । भाषापक्षे, सूत्रविवेचने, प्रकृयापक्षे सर्वत्र मुनित्रयस्यावदानं दृश्यते । मुनित्रयस्य अवदानेन मुनित्रयं सर्वे जानन्ति । परन्तु तेषां जनिविषये मरणविषये च मतैक्यं नैव लभ्यते । कीर्तिर्यस्य स जीवतीतिवत् पाणिनिकात्यायनपतञ्जलयः कीर्त्या जीविताः सन्ति । पाणिनेः सूत्ररचना अद्भूता विद्यते । सूत्रेषु विरोधाभाषादित्रुटयश्च न विद्यन्ते । त्रिसहस्राधिकानि सूत्राण्येव पाणिनेः महदुपलब्धिः विद्यते । सूत्रव्याख्यानाय एव नानाग्रन्थाः, टीकाः, विवेचनानि च सन्ति । तथैव पाणिनिना यददृष्टं तदनेन कात्यायनेन व्याख्यातमस्ति । कात्यायनस्य वार्त्तिकद्वारा पतञ्जलिभाष्यस्य व्याख्या शोभना सञ्जाता अस्ति । पतञ्जलेः महाभाष्यन्तु व्याकरणस्य रत्नमिव मन्यते । मुनित्रयस्य प्रतिभाशक्तिः तत्र दरीदृश्यते । मुनित्रयस्यावदानं सार्थकं दृश्यते । मुनित्रयस्य परिचयपूर्वकं रचितोऽयं निबन्धः मुनित्रयस्यावदानस्य समीक्षणे केन्द्रितोऽस्ति, येन अध्येतारः गुरवश्च लाभान्विताः भवेयुरिति । विषयपरिचयानुसन्धानविधि-समस्याकथनोद्देश्य-सैद्धान्तिकाधार-विषयवस्तुप्रदर्शन-निष्कर्षशीर्षकैः रचितः लेखः एपिएशैल्या [illegible] वर्तते ।

**सन्दर्भसूची**:

आचार्य, गोविन्द (२०१३). *वैयाकरणसिद्धान्तकौमुदी*. चौखम्बा प्रकाशनम् ।

गौड, अशोकचन्द्र (२०५५). *संस्कृतव्याकरणशास्त्रेतिहासविमर्शः*. भारतीय विद्या संस्थानम् ।

त्रिपाठी, जयशङ्करलाल (२०७९). *महाभाष्यम्*. चौखम्बा कृष्णदास अकादमी ।

त्रिपाठी, ब्रह्मानन्द (१९९०). व्याकरणशास्त्रेतिहासः. चौखम्बा सुरभारती प्रकाशन ।

दाहाल, लोकमणि (१९९०). *व्याकरणशास्त्रेतिहासः*. भारती विद्या प्रकाशनम् ।

त्रिपाठी, शास्त्री (२०६७). *लघुसिद्धान्तकौमुदी*. गीताप्रेस ।

पाठक, शङ्करदेव (२०००). *अष्टाध्यायी*. गुरुकुलवृन्दावनस्नातकशोधसंस्थानम् ।

मिश्र, विश्वनाथ (२०१४). *परिभाषेन्दुशेखरः*. चौखम्बा प्रकाशनम् ।

मीमांशक, युधिष्ठिर (ई.२०३०). *व्याकरणशास्त्रका इतिहास*. रामलालकपुरट्रष्ट ।

यादव, प्रकाशाचार्य (२००८). *वैजयन्तीकोष*. चौखम्बा भारतीय एकेडेमी ।

शर्मा, कुलचन्द्र (२०६५). *अमरकोष*. रत्न पुस्तक भण्डार ।

शास्त्री, चारूदेव (२०१७). महाभाष्यम्,दिल्लीः मोतिलालवनारसीदास ।